# Vishnukritam 1 Shiva Stotram

# विष्णुकृतं १ शिवस्तोत्रम्

## Document Information

Text title : Vishnukritam 1 Shiva Stotram

File name : viShNukRRitaM1shivastotram.itx

Category : shiva, bRRihannAradIyapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 79/322-328||

Latest update : November 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 29, 2025

*sanskritdocuments.org*

# विष्णुकृतं १ शिवस्तोत्रम्

विष्णुरुवाच ।
ॐ वेदवेद्याय देवाय तस्मै
शुद्धप्रभाचिन्त्यरूपाय कस्मै ।
ब्रह्माद्यधीशाय सृष्ट्यादिकर्त्रे
विष्णुप्रियायार्तिहन्त्रेऽन्तकर्त्रे ॥ ७९-३२२॥

नमस्तेऽखिलाधीश्वरायाम्बराय
नमस्ते चरस्थावरव्यापकाय ।
नमो वेदगुह्याय भक्तप्रियाय
नमः पाकभोक्त्रे मखेशाय तुभ्यम् ॥ ७९-३२३॥

नमस्ते शिवायादिदेवाय कुर्म
नमो व्यालयज्ञोपवीतप्रधर्त्रे ।
नमस्ते सुराबिन्दुवर्षापनाय
त्रयीमूर्तये कालकालाय नाथ ॥ ७९-३२४॥

धरित्रीमरुद्व्योमतोयेन्दुवह्नि-
प्रभामण्डलात्माष्टधामूर्तिधर्त्रे ।
शिवायाशिवघ्नाय वीराय भूया-
त्सदा नः प्रसन्नो जगन्नाथकेज्यः ॥ ७९-३२५॥

कलानाथभालाय आत्मा महात्मा
मनो ह्यग्रयानो निरूप्यो न वाग्भिः ।
जगज्जाड्यविध्वंसनो भुक्तिमुक्ति-
प्रदः स्तात्प्रसन्नः सदा शुद्धकीर्तिः ॥ ७९-३२६॥

यतः सम्प्रसूतं जगज्जातमीशा-
त्स्थितं येन रक्षावता भावितं च ।
लयं यास्यते यत्र वाचां विदूरे

स वै नः प्रसन्नोऽस्तु कालत्रयात्मा ॥ ७९-३२७॥

यदादिश्च मध्यं तथान्तं न केऽपि
विजानन्ति विज्ञा अपि स्वानुमानाः ।
स वै सर्वमूर्तिः सदा नो विभूत्यै
प्रसन्नोऽस्तु किं ज्ञापयामोऽत्र कृत्यम् ॥ ७९-३२८॥

इति नारदपुराणे पूर्वभागे एकोनाशीतितमाध्यायान्तर्गतं
विष्णुकृतं शिवस्तोत्रं समाप्तम् ।

बृहन्नारदीयपुराण । पूर्वभाग । अध्याय ७९/३२२-३२८॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 79/322-328..

Proofread by PSA Easwaran

*Vishnukritam 1 Shiva Stotram*
pdf was typeset on March 29, 2025

Please send corrections to *sanskrit@cheerful.com*